# nakArAdi shrI narasiMhAShTottarashatanAmastotram

# નકારાદિ શ્રીનરસિંહાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : nakArAdi narasiMhAShTottarashatanAmastotram

File name : nakArAdinarasiMha108nAmastotram.itx

Category : aShTottarashatanAma, vishhnu, dashAvatAra, paNDita-bellaMkoNDa-rAmarAya-kavIndra, vishnu

Location : doc_vishhnu

Author : paNDita shrI bellaMkoNDa rAmarAya kavIndra

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : shrI dashAvatArAShTottara shatanAmAvaliH savyAkhyA

Latest update : January 24, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# નકારાદિ શ્રીનરસિંહાષ્ટોત્તરશતનામસ્તોત્રમ્

શ્રી હયગ્રીવાય નમઃ ।

હરિઃ ૐ

નરસિંહો નરો નારસ્રષ્ટા નારાયણો નવઃ ।
નવેતરો નરપતિર્નરાત્મા નરચોદનઃ ॥ ૧॥

નખભિન્નસ્વર્ણશય્યો નખદંષ્ટ્રાવિભીષણઃ ।
નારભીતદિશાનાશો નન્તવ્યો નખરાયુધઃ ॥ ૨॥

નાદનિર્ભિન્નપાદ્માણ્ડો નયનાગ્નિહુતાસુરઃ ।
નટત્કેસરસઞ્જાતવાતવિક્ષિપ્તવારિદઃ ॥ ૩॥

નલિનીશસહસ્રાભો નતબ્રહ્માદિદેવતઃ ।
નભોવિશ્વમ્ભરાભ્યન્તર્વ્યાપિદુર્વીક્ષવિગ્રહઃ ॥ ૪॥

નિશ્વાસવાતસંરમ્ભ ઘૂર્ણમાનપયોનિધિઃ ।
નિર્દયાઙ્ઘ્રિયુગન્યાસદલિતક્ષ્માહિમસ્તકઃ ॥ ૫॥

નિજસંરમ્ભસન્ત્રસ્તબ્રહ્મરુદ્રાદિદેવતઃ ।
નિર્દમ્ભભક્તિમદ્રક્ષોડિમ્ભનીતશમોદયઃ ॥ ૬॥

નાકપાલાદિવિનુતો નાકિલોકકૃતપ્રિયઃ ।
નાકિશત્રૂદરાન્ત્રાદિમાલાભૂષિતકન્ધરઃ ॥ ૭॥

નાકેશાસિકૃતત્રાસદંષ્ટ્રાભાધૂતતામસઃ ।
નાકમર્ત્યાતલાપૂર્ણનાદનિશ્શેષિતદ્વિપઃ ॥ ૮॥

નામવિદ્રાવિતાશેષભૂતરક્ષઃપિશાચકઃ ।
નામનિશ્શ્રેણિકારૂઢનિજલોકનિજવ્રજઃ ॥ ૯॥

નાલીકનાભો નાગારિવન્દ્યો નાગાધિરાડ્ભુજઃ ।
નગેન્દ્રધીરો નેત્રાન્તસ્ખ્સલદગ્નિકણચ્છટઃ ॥ ૧૦॥

નારીદુરાસદો નાનાલોકભીકરવિગ્રહઃ ।
નિસ્તારિતાત્મીયસન્થો નિજૈકજ્ઞેયવૈભવઃ ॥ ૧૧॥

નિર્વ્યાજભક્તપ્રહ્લાદપરિપાલનતત્પરઃ ।
નિર્વાણદાયી નિર્વ્યાજભક્ત્યેકપ્રાપ્યતત્પદઃ ॥ ૧૨॥

નિર્હ્રાદમયનિર્ઘાતદલિતાસુરરાડ્બલઃ ।
નિજપ્રતાપમાર્તાણ્ડખદ્યોતીકૃતભાસ્કરઃ ॥ ૧૩॥

નિરીક્ષણક્ષતજ્યોતિર્ગ્રહતારોડુમણ્ડલઃ ।
નિષ્પ્રપઞ્ચબૃહદ્ભાનુજ્વાલારુણનિરીક્ષણઃ ॥ ૧૪॥

નખાગ્રલગ્નારિવક્ષસ્સ્રુતરક્તારુણામ્બરઃ ।
નિશ્શેષરૌદ્રનીરન્ધ્રો નક્ષત્રાચ્છાદિતક્ષમઃ ॥ ૧૫॥

નિર્ણિદ્રરક્તોત્પલાક્ષો નિરમિત્રો નિરાહવઃ ।
નિરાકુલીકૃતસુરો નિર્ણિમેયો નિરીશ્વરઃ ॥ ૧૬॥

નિરુદ્ધદશદિગ્ભાગો નિરસ્તાખિલકલ્મષઃ ।
નિગમાદ્રિગુહામધ્યનિર્ણિદ્રાદ્ભુતકેસરી ॥ ૧૭॥

નિજાનન્દાબ્ધિનિર્મગ્નો નિરાકારો નિરામયઃ ।
નિરહઙ્કારવિબુધચિત્તકાનન ગોચરઃ ॥ ૧૮॥

નિત્યો નિષ્કારણો નેતા નિરવદ્યગુણોદધિઃ ।
નિદાનં નિસ્તમશ્શક્તિર્નિત્યતૃપ્તો નિરાશ્રયઃ ॥ ૧૯॥

નિષ્પ્રપઞ્ચો નિરાલોકો નિખિલપ્રીતિભાસકઃ ।
નિરૂઢજ્ઞાનિસચિવો નિજાવનકૃતાકૃતિઃ ॥ ૨૦॥

નિખિલાયુધનિર્ભાતભુજાનીકશતાદ્ભુતઃ ।
નિશિતાસિજ્જ્વલજ્જિહ્વો નિબદ્ધભૃકુટીમુખઃ ॥ ૨૧॥

નગેન્દ્રકન્દરવ્યાત્તવક્ત્રો નમ્રેતરશ્રુતિઃ ।
નિશાકરકરાઙ્કૂર ગૌરસારતનૂરુહઃ ॥ ૨૨॥

નાથહીનજનત્રાણો નારદાદિસમીડિતઃ ।
નારાન્તકો નારચિત્તિર્નારાજ્ઞેયો નરોત્તમઃ ॥ ૨૩॥

નરાત્મા નરલોકાંશો નરનારાયણો નભઃ ।
નતલોકપરિત્રાણનિષ્ણાતો નયકોવિદઃ ॥ ૨૪॥

નિગમાગમશાખાગ્ર પ્રવાલચરણામ્બુજઃ ।
નિત્યસિધ્દો નિત્યજયી નિત્યપૂજ્યો નિજપ્રભઃ ॥ ૨૫॥

નિષ્કૃષ્ટવેદતાત્પર્યભૂમિર્નિર્ણીતતત્ત્વકઃ ।
નિત્યાનપાયિલક્ષ્મીકો નિશ્શ્રેયસમયાકૃતિઃ ॥ ૨૬॥

નિગમશ્રીમહામાલો નિર્દગ્ધત્રિપુરપ્રિયઃ ।
નિર્મુક્તશેષાહિયશા નિર્દ્વન્દ્વો નિષ્કલો નરી ॥ ૨૭॥

॥ ઇતિ નકારાદિ શ્રી નરસિંહાષ્ટોત્તરશતનામસ્તોત્રમ્ પરાભવ
શ્રાવણ શુદ્ધૈકાદશ્યામ્ રામેણ લિખિતા શ્રી હયગ્રીવાય સમર્પિત ॥

Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

Source Book:
shrI dashAvatArAShTottarashatanAmAvaliH savyAkhyA
language: Telugu
Composed by : paNDita shrI bellaMkoNDa rAmarAya kavIndra

---

---

*nakArAdi shrI narasiMhAShTottarashatanAmastotram*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*